## आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती । (१२/१०००)

आसन्दीवत् अष्ठीवत् चक्रीवत् कक्षीवत् रुमण्वत् [1]चर्मण्वती इत्येतानि सञ्ज्ञायां निपात्यन्ते । [2]वत्त्वं पूर्वेणैव सिद्धम्, आदेशार्थानि निपातनानि । आसन्दीवत् इति आसनशब्दस्य[3] आसन्दीभावो निपात्यते । आसन्दीवान् ग्रामः । आसन्दीवदहिस्थलम् । आसनवान् इत्येवान्यत्र । अपरे [4]तु आहुः, [5]आसन्दीशब्दो[6]ऽपि प्रकृत्यन्तरमेवास्ति, तथा चोक्तम्, [7]औदुम्बरी राजासन्दी भवति इति । [8]तस्य 'सञ्ज्ञायाम्' (८.२.११/१८९९) इति [9]वत्त्वेन सिद्धम् । आसन्दीवत् इत्येतत् प्रपञ्चार्थमिह पठ्यते[10], अष्ठीवत् इति अस्थ्नोऽष्ठीभावः । अष्ठीवान् इति शरीरैकदेशसञ्ज्ञा । अस्थिमान् इत्येवान्यत्र । चक्रीवत् इति चक्रशब्दस्य चक्रीभावो निपात्यते । चक्रीवान् राजा । चक्रवान् इत्येवान्यत्र । '[11]चक्रीवन्ति सदो हविर्धानानि भवन्ति' (कात्या. श्रौ. सू. २४. ३. २६) इत्येतत् तु छान्दसत्वाद् अनुगन्तव्यम् । कक्षीवत् इति कक्ष्यायाः सम्प्रसारणं निपात्यते । कक्षीवान् नाम ऋषिः । कक्ष्यावान् इत्येवान्यत्र । रुमण्वत् इति लवणशब्दस्य रुमण्भावो निपात्यते[12] । लवणवान् इत्येवान्यत्र । अपरे तु आहुः, रुमन् इति प्रकृत्यन्तरमस्ति, तस्य एतन्निपातनं नकारलोपाभावार्थम्, णत्वार्थं च । मतोर्वा [13]नुडर्थम् इति । चर्मण्वती इति चर्मणो नलोपाभावो णत्वं च निपात्यते । मतोर्वा नुडागमः । चर्मण्वती नाम नदी । चर्मवती इत्येवान्यत्र ॥

## उदन्वानुदधौ च । (१३/१००१)

उदन्वान् इति उदकशब्दस्य मतावुदन्भावो निपात्यते उदधावर्थे, सञ्ज्ञायां विषये च । उदन्वान् नाम ऋषिः यस्य औदन्वतः पुत्रः । उदधौ उदन्वान् । यस्मिन्नुदकं धीयते स एवमुच्यते । उदधौ इति किम् ? उदकवान् घटः इत्यत्र तु [14]दधात्यर्थो न विवक्ष्यते । किं तर्हि ? [15]उदकसत्ता[16]सम्बन्धसामान्यम् ॥

## राजन्वान् सौराज्ये । (१४/१००२)

राजन्वान् इति निपात्यते सौराज्ये गम्यमाने । शोभनो राजा [17]यस्मिन्निति स राजन्वान् देशः । राजन्वती पृथ्वी । राजवान् इत्येवान्यत्र[18] ॥

## छन्दसीरः । (१५/३६००)

छन्दसि विषये इवर्णान्ताद् रेफान्ताच्च चोत्तरस्य मतोर्वत्वं भवति । इवर्णान्तात् तावत् – 'त्रिवती याज्यानुवाक्या भवति' (काठ. ११.१) । 'हरिवो मेदिनं त्वा' (तै. सं. ४. ७. १४. ४) । '[20]अधिपतिवती जुहोति'

---

1. चर्मण्वत् क. 2. वाक्यमिदं नास्ति क. 3. केचिद् आसन्दीभावं निपातयन्ति क.ड. 4. पुनर् क.ड. 5. आसन्दीशब्दः प्रकृत्यन्तरं विद्यते इति क.ड, आसन्दीब्दः आसनपर्यायः प्रकृत्यन्तरं विद्यते ह. 6. अपि नास्ति ड. 7. औदुम्बर्यासन्दी ड.ड. 8. तस्यैव क.ह. 9. वचनसिद्धम् क. 10. इति इत्यधिकम् क.ड.ह. 11. चक्रीवन्तं शब्दो हविर्दानानि क. 12. रुमण्वान् नाम पर्वतः इत्यधिकम् क.ड. 13. नुडागमः क.ड. 14. धात्वर्थो क.ड. 15. उदकस्य सत्तासम्बन्धसामान्यम् ब. 16. सम्बन्धमात्रम् ड. 17. देशे इत्यधिकम् ह, यस्मिन्नस्ति क. 18. भवति इत्यधिकम् ब.क. 19. त्रिवतीर्याज्यानुवाक्या भवन्ति (का. 11. 1) 20. अधिपतिवतीर्भवन्ति (काठ. 21.3)